न्तकः २ भूगेलुः ३ लघुशेलुः ४ लघुपिच्छिलः ५ लघुशीतः ६ सूक्ष्मफलः ७ लघुभूतद्रुमः ८ भूकर्बुदारः ९ । अस्य गुणाः । मधुरत्वम् । क्रमिशूलनाशित्वम् । वातप्रकोपणत्वम् । किञ्चित् शीतत्वम् । स्वर्णमारकत्वञ्च । इति राजनिर्घण्टः ॥

भूकलः, पुं, (भुवः पृथिव्याः कलः ।) दुर्विनीताश्वः । इति राजनिर्घण्टः ॥

भूकश्यपः, पुं, (भुवि पृथिव्यां कश्यप इव भुवः कश्यप इति वा ।
"तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः ।
वसुदेव इति ख्यातो गोषु तिष्ठति भूतले ॥"
इति हरिवंशीयवचनेनास्य कश्यपांशसम्भूतत्वात् तथात्वम् ।) वसुदेवः । इति त्रिकाण्डशेषः ॥

भूकाकः, पुं, (भुवि ख्यातः काकः ।) स्वल्पकङ्कः । क्रौञ्चः । नीलकपोतः । इति शब्दरत्नावली ॥

भूकुम्भी, स्त्री, (भुवि कुम्भीव ।) भूपाटली । इति राजनिर्घण्टः ॥

भूकुष्माण्डी, स्त्री, (भुवि कुष्माण्डीव ।) विदारी । इति राजनिर्घण्टः ॥

भूकेशः, पुं, (भुवः पृथिव्याः केश इव ।) शैवलः । वटः । इति मेदिनी । शे, २६ ॥

भूकेशा, स्त्री, (भूकेश + टाप् ।) राक्षसी । इति शब्दरत्नावली ॥

भूकेशी, स्त्री, (भूकेश + स्त्रियां ङीप् ।) अवल्गुजः । इति मेदिनी । शे, २७ ॥

भूक्षित्, पुं, (भुवं क्षितिं क्षिणोतीति + क्षिद् + क्विप् ।) शूकरः । इति त्रिकाण्डशेषः ॥

भूखर्ज्जूरी, स्त्री, (भूसंलग्ना खर्ज्जूरी । शाकपार्थिवादिवत् समासः ।) क्षुद्रखर्ज्जूरी । तत्पर्य्यायः । भूयुक्ता २ वसुधाखर्ज्जूरिका ३ भूमिखर्ज्जूरी ४ । अस्या गुणाः । मधुरत्वम् । शिशिरत्वम् । दाहपित्तहरत्वञ्च । इति राजनिर्घण्टः ॥

भूगरं, क्ली, (भुवः पृथिव्या गरम् ।) विषम् । इति राजनिर्घण्टः ॥

भूगर्भः, पुं, भवभूतिः । स च मालतीमाधवादिनाटककर्त्ता । इति जटाधरः ॥ (भूः सर्व्वभूताश्रयभूता पृथ्वी गर्भे कुक्षौ यस्येति । विष्णुः । यथा, महाभारते । १३ । १४९ । २१ ।
"हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥")

भूगोलः, पुं, (भूर्गोलो मण्डलमिव ।) भुवनकोषः । (यदुक्तं सूर्य्यसिद्धान्ते ।
"मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति ।
बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम् ॥")
तस्य विवरणम् । यथा,—
"प्रकृतेस्तु महान् जातोऽहङ्कारो महतः पुनः ।
तन्मात्राणि ह्यहङ्कारात् शब्दः स्पर्शोऽथ रूपकम् ।
रसो गन्धश्च पञ्चैव गुणा नाम प्रकीर्त्तिताः ।
पञ्चेमानि महाभाग ! महाभूतानि संग्रहात् ।
तेभ्य एव प्रजातानि सर्व्वाणि गुणवन्ति च ॥
भूमिरापस्तथा वायुरग्निराकाशमेव च ।
गुणोत्तराणि सर्व्वाणि तेषां भूमिः प्रधानतः ॥
शब्दः स्पर्शश्च रूपञ्च रसो गन्धश्च पञ्चमः ।
भूमावेते गुणाः प्रोक्ता ह्रसन्ति परतः क्रमात् ॥
चत्वारोऽप्सु गुणा ब्रह्मन् ! गन्धस्तत्र न वर्त्तते ।
शब्दः स्पर्शश्च रूपञ्च त्रय एव हि तेजसि ॥
शब्दः स्पर्शोऽथ वायोस्तु आकाशे शब्द एव हि ।
एते पञ्च गुणाः प्रोक्ता महाभूतेषु पञ्चसु ॥
वर्त्तन्ते सर्व्वभूतेषु येषु लोकाः प्रतिष्ठिताः ।
अन्योन्यं नातिवर्त्तन्ते सम्यग्भवति वै तदा ॥
यदा तु विषमं भावमाविशन्ति परस्परम् ।
तदा देहवियोगः स्याद्देहिनां नान्यथा द्विज ! ॥
अनुपूर्व्वा विनश्यन्ति जायन्ते चापि सर्व्वशः ।
सर्व्वाण्यपरिमेयाणि तदेषां रूपमैश्वरम् ॥
तत्र तत्र हि दृश्यन्ते धातवः पाञ्चभौतिकाः ।
तेषां मनुष्यास्तर्केण प्रमाणानि प्रचक्षते ॥
अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् ।
प्रकृतिभ्यः परं यत्तु तदचिन्त्यस्य लक्षणम् ॥ * ॥
जम्बुद्वीपं प्रवक्ष्यामि वात्स्यायन महामुने ! ॥
परिमण्डलो महाभाग ! द्वीपोऽसौ चक्रवत् स्थितः ।
नदीगिरिप्रतिच्छन्नो विविधैः पत्तनैरपि ॥
वनैर्जनपदैर्वृक्षैस्तथा पुष्पफलोपगैः ।
लवणेन समुद्रेण समन्तात् परिवारितः ॥
प्रागायता महाभाग ! षड़ेते रत्नपर्व्वताः ।
अवगाढ़ा ह्युभयतः सागरौ पूर्व्वपश्चिमौ ॥
हिमवान् हेमकूटश्च निषधश्च नगोत्तमः ।
नीलः श्वेतः शृङ्गवांश्च रत्नधातुविचित्रिताः ॥
अयुतानि योजनानि उच्छ्रायास्तेषु कीर्त्तिताः ।
पृथुत्वे च द्विसाहस्रयोजनास्ते च पर्व्वताः ॥
तेषामन्तरविष्कम्भे नवसाहस्रयोजनः ।
वर्षे वर्षे प्रमाणन्तु वर्षाणि त्रीणि दक्षिणे ॥
तत्र पुण्या जनपदास्तेषु वर्षेषु तापस ! ।
वसन्ति तेषु सर्व्वाणि सत्त्वानि विविधानि च ॥
दक्षिणे भारतं वर्षमुत्तरे लवणोदधेः ।
कूलादेव महाभाग ! तस्य सीमा हिमालयः ॥
ततः किंपुरुषं वर्षं हेमकूटादधस्ततः ।
हरिवर्षं ततो ज्ञेयं निषधोऽवधिरुच्यते ॥
एवमेवोत्तरे त्रीणि वर्षाणि च तपोधन ! ।
कुरुवर्षं सिन्धुकूलात् शृङ्गवानवधिः स्मृतः ॥
हिरण्मयं ततो वर्षं श्वेतावधि निगद्यते ।
रम्यकञ्च ततो वर्षं नीलस्तस्यावधिः स्मृतः ॥
दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु ।
प्रागायतो महाभाग ! माल्यवान्नाम पर्व्वतः ॥
पश्चिमे तु तथैवास्ते पर्व्वतो गन्धमादनः ॥
पूर्व्वे समुद्रकूलात्तु भद्राश्वं नाम वर्षकम् ॥
माल्यवानवधिस्तस्य केतुमालञ्च पश्चिमे ।
गन्धमादनसीमान्तं नवसाहस्रयोजनम् ॥ * ॥
परिमण्डलस्तयोर्म्मध्ये मेरुः कनकपर्व्वतः ।
आदित्यतरुणाभासो विधूम इव पावकः ॥
लक्षयोजन उच्छ्रायो मूर्द्ध्नि द्वाविंश एव च ।
योजनानां सहस्राणि मूले चापि तु षोड़श ॥
विस्तृतः स महाभाग ! भूमिष्ठं मूलमस्य तु ।
प्रविष्टमन्तर्भूम्यां वै षोड़शैव सहस्रकम् ॥
ऊर्द्ध्वमन्तश्च तिर्य्यक् च लोकानावृत्य तिष्ठति ।
तस्य चेलावृतं वर्षं सर्व्वतः परिकीर्त्तितम् ॥
विहगः सुमुखो यस्तु सुपर्णस्यात्मजः किल ।
स वै विचिन्तयामास सौवर्णान् प्रेक्ष्य वायसान् ॥
मेरुरुत्तममध्यानामवराणाञ्च पक्षिणाम् ।
अविशेषकरो यस्मात्तस्मादेनं त्यजाम्यहम् ॥
तमादित्योऽनुपर्य्येति सततं ज्योतिषां वरः ।
चन्द्रमाश्च सनक्षत्रो वायुश्चैव प्रदक्षिणम् ॥
स पर्व्वतो महाभाग ! दिव्यपुष्पसमन्वितः ।
भवनैरावृतः सर्व्वैर्जाम्बूनदमयैः शुभैः ॥
तत्र देवगणा ब्रह्मन् ! गन्धर्व्वासुरराक्षसाः ।
अप्सरोगणसंयुक्ताः शैले क्रीड़न्ति सर्व्वदा ॥
अवष्टम्भकरास्तस्य मन्दरो मेरुमन्दरः ।
सुपार्श्वः कुमुदश्चेति चतुर्दिक्षु स्थिता द्विज ! ॥
अयुतयोजनोन्नाहास्तावद्विस्तारसंयुताः ।
चतुर्ष्वेतेषु धर्म्मज्ञ ! चूतजम्बूकदम्बकाः ॥
न्यग्रोधश्चापि चत्वारः पादपा ब्राह्मणर्षभ ! ।
सहस्रयोजनोन्नाहास्तावद्विटपविस्तृताः ॥
केतुभूताः पर्व्वतानां विशालाः शतयोजनम् ।
ह्रदाश्च तत्र चत्वारः पयोमध्विक्षुवारिदाः ॥
देवोद्यानानि चत्वारि हि चैत्ररथनन्दने ।
सर्व्वतोभद्रमित्येवं तथा वैभ्राजकं वनम् ॥
तेषु देवस्त्रियो नित्यं विहरन्ति सुरैः सह ।
गन्धर्व्वाः किन्नराश्चैव तथान्ये सिद्धचारणाः ॥
गायन्तो मधुरं दिव्यं स्त्रीभिः क्रीड़न्ति तापस ! ।
चूतो यो मन्दरोत्सङ्गेऽयुतयोजनसुच्छ्रितः ॥
फलान्यमृतकल्पानि पतन्त्यस्य सुदूरतः ।
तेषां विशीर्य्यमाणानां रसेनाजनि या नदी ॥
अरुणोदा नाम सैव वहते मन्दराचलात् ।
यज्जलस्पर्शमात्रेण भवानीशिवयोर्गणाः ॥
स्वदेहसौरभेणापि समन्ताद्दशयोजनम् ।
सुगन्धयन्ति वातेन वात्स्यायन ! तदद्भुतम् ॥
एवं जम्बूफलानाञ्च पततां मेरुमन्दरे ।
हस्तिकायप्रमाणानां रसेनाता महानदी ॥
सैव जम्बूनदी नाम दक्षिणेन इलावृतम् ।
तीरयोरुभयोरेव जम्बूरसपरिप्लुता ॥
मृत्तिकैव सुवर्णं स्यात् वार्य्यर्ककिरणान्वयात् ।
तच्च जाम्बूनदं हेम नानाभरणसंश्रितम् ॥
देवोपदेवगन्धर्व्वा धारयन्ति सह स्त्रिया ।
यो वै महाकदम्बश्च सुपार्श्वोपरि तापस ! ॥
तत्कोटरेभ्यः पञ्चैव मधुधाराः स्रवन्ति वै ।
पञ्चायामपरीणाहाः पश्चिमेन इलावृतम् ॥
यासां रसांश्च भुञ्जानाः सुमुखोद्गारवायुना ।
सुगन्धयन्ति धर्म्मज्ञ ! समन्तात् शतयोजनम् ॥
कुमुदाग्रनिरूढ़ो यः शतवल्शो वटो महान् ।
स्कन्धेभ्यस्तस्य नद्यस्तु उत्तरेण इलावृतम् ॥
पयस्विनीदधिह्रदाष्टतकुल्यामधुस्रवाः ।